# Pundarikambarishakritam Purushottama Stotram

# પુણ્ડરીકામ્બરીષકૃતં પુરુષોત્તમસ્તોત્રમ્ ૪

## Document Information

Text title : Pundarikambarishakritam Purushottama Stotram

File name : puNDarIkAmbarIShakRRitaMpuruShottamastotram04.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 583/33-47||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# પુણ્ડરીકામ્બરીષકૃતં પુરુષોત્તમસ્તોત્રમ્ ૪

ત્રિઃ પરિક્રમ્ય તં કૃષ્ણનારાયણં કૃતાઞ્જલી ।
તુષ્ટુવાતે મુહુસ્તૌ ચ હૃદયસ્થં દૃશોશ્ચરમ્ ॥ ૩૩॥

આવાં કામાર્થલુબ્ધૌ ચ પાપમાત્રાભિચારિણૌ ।
ઋષીણાં કૃપયા ચાત્ર શરણં તે હ્યુપાગતૌ ॥ ૩૪॥

અનુકમ્પય નૌ નાથ સુદીનૌ શરણાગતૌ ।
મૂઢૌ દુષ્કૃતકર્માણૌ પતિતૌ ભવસાગરે ॥ ૩૫॥

કોઽન્યસ્ત્વત્સદૃશો બન્ધુર્મહાભયનિવારકઃ ।
સ્વાર્થશૂન્યઃ પરાર્થૈકધ્યેયોઽનાથપતિઃ પ્રભુઃ ॥ ૩૬॥

નારાયણેતિ ત્વન્નામ ચતુર્વર્ગૈકસાધનમ્ ।
"ૐ નમઃ શ્રીકૃષ્ણનારાયણાય સ્વામિને સ્વાહા" ॥ ૩૭॥

મન્ત્રસ્તે મોક્ષદશ્ચાતિપાપિનાં પાવકોઽસ્તિ હિ ।
જપ્તો ભવાન્ પરં પારં પ્રાપયત્યેવ તેન હિ ॥ ૩૮॥

તન્નૌ પ્રસીદ દેવેશ દૃઢાં ભક્તિં પ્રદેહિ નૌ ।
ઘોરાદુસ્તરખાતાચ્ચ સમુત્તારય કેશવ ॥ ૩૯॥

ઇન્દ્રિયાણિ મનો બુદ્ધિસ્તવ મૂર્તૌ વસન્તુ નઃ ।
આત્મા સંસ્કારસહિતશ્ચાર્પિતસ્તવ પાદયોઃ ॥ ૪૦॥

પ્રસીદ દેવ સર્વાત્મન્નસઙ્ખ્યેયશિરોભુજ ।
અસઙ્ખ્યઘ્રાણનયનપાણિપાદ નમોઽસ્તુ તે ॥ ૪૧॥

ષડ્વિંશસ્ત્વં ચાન્તરાત્મન્ નિષ્પ્રપઞ્ચઃ પ્રવર્તસે ।
ચતુષ્પુમર્થમૂર્તિસ્ત્વં જગન્નાથ નમોઽસ્તુ તે ॥ ૪૨॥

ત્વદારાધનયા કૃષ્ણ ભવન્તિ સર્વસિદ્ધયઃ ।
યોગાભ્યાસં વિના ચાસ્મૈ કૃષ્ણાય તે નમો નમઃ ॥ ૪૩॥

ભક્તિં દૃઢાં પ્રદેહ્યાવાં નાસ્ત્યન્યત્પ્રાર્થનીયકમ્ ।
યાવત્પ્રાણાન્ધારયાવસ્તાવદ્ભક્તિર્દૃઢા ત્વયિ ॥ ૪૪॥

તતઃ પારેઽપિ તે ભક્તિં દેહિ નારાયણપ્રભો ।
અગાધભવપઙ્કેઽત્ર નિમગ્નયોઃ પરાયણમ્ ॥ ૪૫॥

દાસ્યં નાથ સદા દેહિ ચાનુકમ્પ્ય નૌ વિભો ।
ઇતિ સ્તુવન્તૌ તૌ ભક્તૌ પેતતુર્દણ્ડવત્ ક્ષિતૌ ॥ ૪૬॥

પ્રસીદેતિ વદન્તૌ ચ મુહુશ્ચક્રતુર્દર્શનમ્ ।
દિવ્યદૃષ્ટ્યા વિલોક્યૈવં નેમતુશ્ચ મુહુર્મુહુઃ ॥ ૪૭॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૫૮૩-અધ્યાયાન્તર્ગતં
પુણ્ડરીક-અમ્બરીષકૃતં પુરુષોત્તમસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૫૮૩/૩૩-૪૭॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 583/33-47..

Proofread by PSA Easwaran

---

*Pundarikambarishakritam Purushottama Stotram*
pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*